# 2025

## SANSKRIT — HONOURS

**Paper : DSCC-8**

**(Smṛti Literature : Ancient Indian Science of Polity and Administration)**

**Full Marks : 75**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Unit – I**

**(Marks : 25)**

1. यथेच्छ**मेकतरस्य** उत्तरं देयम्।

(a) धर्मलक्षणं संक्षेपेण प्रतिपाद्य धर्मशास्त्रधर्मसूत्रयोः पार्थक्यं प्रदर्शयत। 4+6

(b) को नाम निबन्धः? वङ्गीयनिबन्धकारस्य रघुनन्दनस्य कृतिः यथामति आलोचनीया। 2+8

2. अधःप्रदत्तेषु यथाकामं टीका**द्वयं** लेख्यम्। 5×2

(a) गौतमः

(b) पराशरः

(c) कामन्दकीयनीतिसारः।

3. यथाकामं प्रश्न**पञ्चकं संस्कृतभाषया देवनागरलिप्या** च समाधेयम्। 1×5

(a) धर्मशास्त्रस्य मुख्यः उत्सः कः?

(b) याज्ञवल्क्योपनिबद्धेषु धर्मशास्त्रप्रवर्त्तकेषु यथामति द्वयोः नामोल्लेखः कार्यः।

(c) नीतिशब्दस्य व्युत्पत्तिः का?

(d) अर्थशास्त्रे अर्थशब्दस्य कोऽर्थः?

(e) नारदानुसारं विवादपदानि कति?

(f) व्यवहारमातृकायाः प्रणेता कः?

(g) याज्ञवल्क्यसंहितायाः एकस्याः प्रसिद्धायाः टीकायाः नाम लेख्यम्।

(h) 'दीपकलिका'–इति टीका केन प्रणीता?

## Unit – II

**(Marks : 30)**

4. यथेच्छ**मेकतरस्य** उत्तरं प्रदेयम्।

(a) किं नाम व्यसनम्? व्यसनमरणयोर्मध्ये किं तावद् अधिककष्टकरं भवति? मनुसंहितायाः सप्तमाध्यायानुसारं कामजव्यसनमधिकृत्य कश्चन लघुनिबन्धः प्रस्तूयताम्। 2+1+7

(b) मनुमनुसृत्य दण्डस्य उत्सं, स्वरूपम्, उपयोगं च आधारीकृत्य नातिदीर्घः प्रबन्धः लिख्यताम्। 2+4+4

5. कश्चि**देको** व्याख्येयः। 6×1

(a) एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम्।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम्॥

(b) यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः॥

6. यथेच्छ**मेकस्य** वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः। 4×1

(a) अद्यात्काकः पुरोडाशं श्वावलिह्याद्धविस्तथा।
स्वाम्यञ्च न स्यात्कस्मिंश्चित्प्रवर्तेताधरोत्तरम्॥

(b) समोत्तमाधमै राजा त्वाहूतः पालयन्प्रजाः।
न निवर्तेत संग्रामात्क्षात्रं धर्ममनुस्मरन्॥

7. संक्षिप्ता टीप्पणी लेख्या। 4×1

(a) गिरिदुर्गम्

*अथवा,*

(b) उपायचतुष्टयम्।

8. यथाकामं प्रश्न**त्रयं संस्कृतभाषया देवनागरलिप्या** च समाधेयम्। 2×3

(a) मनुसंहितायां कति अध्यायाः सन्ति? तस्याः उपरि कुल्लूकभट्टेन विरचितायाः टीकायाः नाम किम्?

(b) ईश्वरः केन उपादानेन नृपं सृष्टवान्?

(c) शिलोञ्छं किम्?

(d) कुलं किम्?

(e) वैनयिकी क्रिया का?

## Unit – III

**(Marks : 20)**

9. अधोलिखितयोः कस्य***चिदेकस्यो***त्तरं लेख्यम्।

(a) कौटिल्यनये विद्या कतिविधा? तेषु प्रदीपतुल्या का? तस्याः स्वरूपं कौटिल्यानुसारम् आलोचयत। 1+1+8

(b) अर्थशास्त्रानुमतं त्रय्याः स्वरूपं लेख्यम्। सा विद्या कथं वर्णानामाश्रमाणाञ्च औपकारिकी तद्वैशद्येन आलोच्यताम्। 3+7

10. अधोदत्तेभ्यो यथामति ***द्वयस्य*** संक्षिप्ता टिप्पणी लेख्या। 3×2

(a) वार्ता

(b) मात्स्यन्यायः

(c) योगक्षेमम्।

11. यथाभिलषितं प्रश्न***द्वयं*** साध्यम्। 2×2

(a) कौटिलीयार्थशास्त्रस्य एकस्याः प्रसिद्धायाः टीकायाः नामोल्लेखः कार्यः। तस्याः प्रणेतुर्नाम च लेख्यम्।

(d) का नाम लोकयात्रा?

(c) यथार्हदण्डः कथं पूज्यः?